इति किम् ? [1]'आग्निवारुणीमनड्वाहीमालभेत' (काठ. १३.६)। अग्नेः 'ईदग्नेः सोमवरुणयोः' (६.३.२७/९२३) इत्यस्य अनङपवादस्य 'इद्वृद्धौ' (६.३.२८/९२५) [2]इति प्रतिषेधो विधीयते, तेन दीर्घात् परो न भवति ॥

## प्राचां नगरान्ते। (२४/१४३१)

प्राचां देशे [3]नगरान्तेऽङ्गे पूर्वपदस्य उत्तरपदस्य च अचामादेरचः वृद्धिर्भवति तद्धिते ञिति, णिति, किति [4]च परतः। सुह्मनगरे भवः [5]सौह्मनागरः। पौण्ड्रनागरः। प्राचाम् इति किम् ? मद्रनगरमुदक्षु, तत्र भवः [6]माद्रनगरः ॥

## जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्। (२५/१४३२)

जङ्गल धेनु वलज इत्येवमन्तस्य अङ्गस्य पूर्वपदस्य अचामादेरचो वृद्धिर्भवति, विभाषितमुत्तरम् उत्तरपदस्य विभाषा भवति तद्धिते ञिति, णिति, किति [7]च परतः। [8]कुरुजङ्गलेषु भवम् कौरुजङ्गलम्, कौरुजाङ्गलम्। [9]वैश्वधेनवम्, वैश्वधैनवम्। सौवर्णवलजः, सौवर्णवालजः ॥

## अर्धात् परिमाणस्य पूर्वस्य तु वा। (२६/१६८४)

अर्धशब्दात् [10]परस्य परिमाणवाचिनः उत्तरस्य अचामादेरचः स्थाने वृद्धिर्भवति, पूर्वस्य [11]तु वा भवति तद्धिते ञिति, णिति, किति च[12] परतः। अर्धद्रोणेन क्रीतम् आर्धद्रौणिकम्, अर्धद्रौणिकम्। आर्धकौडविकम्, अर्धकौडविकम्। परिमाणस्य इति किम् ? अर्धक्रोशः प्रयोजनमस्य आर्धक्रोशिकम् ॥

## नातः परस्य। (२७/१६८५)

अर्धात् [13]परस्य परिमाणाकारस्य[14] वृद्धिर्न भवति, पूर्वस्य तु वा भवति तद्धिते ञिति, णिति, किति [15]च परतः। [16]अर्धप्रस्थिकः, आर्धप्रस्थिकः। अर्धकंसिकः, आर्धकंसिकः। अतः इति किम् ? आर्धकौडविकः। तपरकरणं किम् ? इह मा भूत्, अर्धखार्यां भवा अर्धखारी। किं च स्यात् ? अर्धखारी भार्या यस्य अर्धखारीभार्यः, 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (६.३.३९/८४०) इति पुंवद्भावप्रतिषेधो न स्यात्। यत्र हि तद्धिते वृद्धिः प्रतिषिध्यते, स वृद्धिनिमित्तं न भवति इति पुंवद्भावो न प्रतिषिध्यते, यथा वैयाकरणी भार्या अस्य वैयाकरणभार्यः इति ॥

---

1. अग्निवारुणीम् ब. 2. इत्यस्य प्रसङ्गे इ. 3. नगरशब्दान्ते इ. ह. 4. वा ब. 5. सुह्मनागरः इत्यधिकम् ब. इ. 6. मद्रनागरः इ. 7. वा ब. ह. 8. कुरुषु जङ्गलम् इत्यधिकम् क. ड. इ. 9. विश्वधेनोः प्रत्यये इत्यधिकम् क, विश्वधेनुषु भवम् इत्यधिकम् ह. 10. उत्तरस्य क. इ. 11. तु नास्ति इ. 12. प्रत्यये इत्यधिकम् क. 13. उत्तरस्य क. 14. चादेः अचः स्थाने इत्यधिकम् क. इ, परिमाणवाचिनः उत्तरपदस्य इत्यधिकम् ह. 15. तु प्रत्यये क. 16. अर्धप्रस्थिकम्, आर्धप्रस्थिकम् ह.